**प्रति** अव्य॰ प्रथ–डति । १व्याप्तौ २लक्षणे ३कञ्चित्प्रकार- मापन्नस्य कथने ४भागे ५प्रतिदाने ६प्रतिनिधीकरणे मेदि॰ ७स्तोके ८क्षेपे ९निश्चये १०व्यावृत्तौ ११आभिमुख्ये १२स्वभावे च शब्दर॰ । अस्य निपातत्वेऽपि क्रिया- योगे उपसर्गत्वम् गतित्वञ्च । अस्यार्थभेदोदाहरणादि गणरत्नमहोदधिटी॰ उक्तं यथा “प्रति साहश्या- दानहिंसाङ्गीकृतिप्रतिनिधिव्याध्याभिमुख्यव्याप्तिवारणेषु । प्रतिदेवता । प्रतिगृह्णाति । प्रतिहन्ति प्रतिज्ञानम् । अभिमन्युरर्जुनतः प्रति । प्रतिश्यायः । प्रतिसूर्य्यं गतः । प्रतिकीर्णम् पांशुभिः । प्रतिषिद्धः” । तत्र लक्ष- णेत्थम्भूताख्यानभागवीप्सायामस्य कर्मप्रवचनीयसंज्ञा तद्योगे द्वितीया परिशब्दे उदा॰ दृश्यम् । प्रतिनिधि- प्रतिदानयोः कर्मप्रवचनीयसंज्ञा तद्योगे पञ्चमी । प्रद्युम्नः कृष्णात्प्रति प्रतिनिधिरित्यर्थः । तिलेभ्यः प्रतियच्छति माषान्, माषान् गृहीत्वा प्रतिरूपतया तिलान् ददाती- त्यर्थः । मात्रार्थेऽस्याव्ययीभावे परनिपातः । शाकप्रति- शाकस्य लेश इत्यर्थः । कर्मप्रवचनीयत्वे नोपसर्गसंज्ञा तेन वृक्षं वृक्षं प्रतिसिञ्चतीत्यादौ न षत्वं तथा गतिसंज्ञापि न, तेन गतिर्गताविति निघातो न । “प्रतेरंश्वादयस्तत्पुरुषे पा॰ प्रतेः परस्यांश्वादेः अन्तोदात्तता अंश्वादिशब्दे २७पृ॰ दृश्यम् ।

**प्रतिक** त्रि॰ कार्षापणेन क्रीतः ठिठन् (इकार उच्चारार्थः) प्र- तिरादेशश्च । कार्षापणेन क्रीते स्त्रियां टित्त्वात् ङीप् । ततः पुरोहिता॰ भावे यक् । प्रातिक्य तद्भावे न॰

**प्रतिकण्ठ** अव्य॰ वीप्सार्थे समीप्ये वा अव्ययीभावः । १कण्ठे कण्ठे इत्याद्यर्थे २कण्ठसामीप्ये च । प्रतिकण्ठं गृह्णाति ठक् । प्रातिकण्ठिक कण्ठसमीपग्राहिणि ।

**प्रतिकर** पु॰ प्रति+कृ-विक्षेपे भावे अप् । १विस्तीर्णतायां २विक्षेपे च । [प्रतीकारकर्त्तरि ।

**प्रतिकर्त्तृ** त्रि॰ प्रति+कृ-तृच् । कृतस्यापकारस्य प्रत्यपकारके

**प्रतिकर्म्मन्** न॰ प्रति+कृ-मनिन् । १विद्यमानस्य गुणान्तरा धाने २कृत्रिमभूषायां प्रसाधने अमरः ।

**प्रतिकर्ष** पु॰ प्रति+कृष-भावे घञ् । १समाकर्षणे अन्वयार्थं पूर्व्वोपात्तस्य पदादेर्ग्रहणे कात्या॰ १५।८।१० कर्कः ।

**प्रतिक(ष्क)श** प्रति+कश-गतिशासनयोः अच् सुट् नि॰। सुडभावः । १सहाये २पुरोगे च सि॰कौ॰ । ३वार्त्ता- हरे मेदि॰ । प्रतिगतः कशाम् प्रा॰स॰ । प्रतेः न कशिं प्रत्युपसर्गत्वम् किन्तु गमेरेवोपसर्गत्वमतो न सुट् । ४कशाघातप्राप्तेऽश्वे सि॰कौ॰ । [२तद्वृत्तौ च ।

**प्रतिकष्ट** न॰ प्रतिरूपं कष्टं प्रा॰त॰ । १कर्मानुरूपकष्टे

**प्रतिकाम** अव्य॰ कामं कामं प्रति अव्ययी॰ । प्रत्येककामे

**प्रतिकाय** पु॰प्रति+चि-घञ् कयादेशः । १प्रतिरूपके २शरव्ये लक्ष्ये च जटा॰ ।

**प्रति(ती)कार** पु॰ प्रति+कृ-घञ् वा दीर्घः । १वैरनिर्यातने कृतस्यापकारस्य तुल्यरूपापकारकरणेन २शोधने ३रोगा- देश्चिकित्सायाञ्च शब्दरत्ना॰ ।

**प्रति(ती)काश** पु॰ प्रतिरूपः काशः प्र+काश-घञ् वा प्रा॰स॰ दीर्घः । तुल्यत्वे अस्य निभा॰ नित्यस॰ । अमरटीकायां रमानाथेनायं दन्त्यान्ततया पठितः ।

**प्रतिकितव** पु॰प्रतिकूलः कितवः प्रा॰त॰ । द्यूतकारस्य प्रति- कूले द्यूतकारे येन सह द्यूतप्रवृत्तिस्तस्मिन् ।

**प्रतिकूप** पु॰ प्रतिरूपः कूपः प्रा॰त॰ । परिखायां हारा॰ ।

**प्रतिकूल** त्रि॰ प्रतिरूपं कूलं पक्षोऽस्य प्रा॰ब॰ । १अननुकूले विरुद्धपक्षावलम्बिनि प्रतीपे अमरः प्रा॰स॰ । २विप- रीताचरणे न॰ ।

**प्रतिकृति** स्त्री प्र+कृ-कर्मादौ क्तिन् । १प्रतिमायां २सादृश्ये ३प्रतिनिधौ अमरः । ४प्रतिकाशे मेदि॰ ।

**प्रतिकृष्ट** त्रि॰ प्रति+कृष-क्त । १गर्ह्ये २द्विरावृत्तया ३कृष्ट- क्षेत्रादौ च मेदि॰ । [प्रति कोपे च

**प्रतिकोप** पु॰प्रतिरूपः कोपः । १रोगस्यानुरूपे कोपे २विपक्षं

**प्रतिक्रिया** स्त्री प्रति+कृ-भावे श । प्रति(ती)कारे

**प्रतिक्षण** अव्य॰क्षणं क्षणं व्याप्य व्याप्तौ अव्ययी॰ । आभीक्ष्ण्ये

**प्रतिक्षय** पु॰ प्रति+क्षि-ऐश्वर्य्ये अच् । रक्षके शब्दर॰

**प्रतिक्षिप्त** त्रि॰ प्रति+क्षिप-कर्मणि क्त । १प्रेषिते २वारिते मेदि॰ । ३बाधिते ४तिरस्कृते च अमरः । “आहूय प्रेषितो यस्तु प्रतिक्षिप्तः स उच्यते” इत्युक्ते ५आहूयप्रेषिते कृष्णदासः । [६तिरस्कारे च ।

**प्रतिक्षेप** पु॰ प्रति+क्षिप-भावे घञ् । १निरासे मेदि॰ ।

**प्रतिखुर** पु॰ सुश्रुते एकीयमतोक्ते मूढगर्भभेदे “निःसृतहस्त- पादशिरःकायसङ्गी प्रतिखुरः” इति तत्र लक्षितम् ।

**प्रतिख्याति** स्त्री प्रति+ख्या-भावे क्तिन् । १विख्यातौ २अ- तिख्यातौ अमरः ।

**प्रतिगत** न॰ प्रति+गम-भावे क्त । “गतागतप्रतिगतसख्या- ताद्याश्च पक्षिणाम्” जटाधरोक्ते १खगगतिभेदे २परा- वृत्यगमने च । कर्त्तरि क्त । ३परावृत्ते त्रि॰ ।

**प्रतिगर** पु॰प्रतिगीर्य्यते प्रत्युच्चार्य्यते प्रति+गॄ-भावे अप् । वैदि-